# वृद्धिरादैच्- भाष्यदिशा एकं अवलोकनम्।

**Dr. Seema V.Madhavan**
Contract Lecturer Dept. of Vykarana SSUS, Kalady

पाणिनिना प्रोक्तं कात्यायनादिभि : पोषितं च संस्कृतव्याकरणं त्रिमुनिव्याकरणमिति व्यवह्रियते। सूत्रकारः पाणिनिः वार्तिककारः कात्यायनः भाष्यकारः पतञ्जलिःच।

**कृतयः**

पतञ्जलिकृताः ग्रन्थाःचरह संहिता, महाभाष्यं, योगसूत्रम् च। सूत्राणां वार्तिकानां च पर्यालोचनया पतञ्जलिना कृतम् अत्यन्तं विपुलं व्याख्यानं भवति महाभाष्यम्। व्याख्यानस्य प्रसिद्ध लक्षणं भवति-

"पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्।।" [1]

पराशरोपपुराणे भाष्यलक्षणम् उक्तम्-

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।" [2]

अस्मिन् ग्रन्थे पूर्वपक्षसिद्धान्तरूपेण सुन्दरं प्रतिपादनं अस्ति। व्याकरणे विद्यामानानां दुर्ग्राह्यानां शास्त्रतत्त्वानां विवरणविषये महाभाष्यकारस्य विवरणरीतिः अत्यन्तं सरला भवति। विविधप्राचीनग्रन्थेषु पतञ्जलेः नामान्तराणि द्रष्टुं शक्यते। तानि- गोनदीया, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः, चूर्णिकारः, पदकारः इति। [3]

**कालः-**

महाभाष्ये विद्यामानानां विषयाणाम् अनुसारेण पतञ्जलेः कालः क्रिस्तोः पूर्वं द्वितीयशतकम् इति ऐतिहासिकानां अभिप्रायः। [4] योगशास्त्रे प्रमाणकः ग्रन्थः योगसूत्रनामकः पतञ्जलिकृतः भवति। महाभाष्ये न केवलं व्याकरणशास्त्र प्रतिपादनम् अपि तु अन्येषां शास्त्राणां समग्रप्रतिपादनं वर्तते। अन्यभाष्याणि अपेक्ष्य सर्वविषयप्रतिपादनत्वात् अयं ग्रन्थः महाभाष्यम् इत्युच्यते।

वार्तिकसाहितानां पाणिनीयसूत्राणाम् भाष्यं विरचितम् पतञ्जलिना। गुरुशिष्यसंवादरूपेण विरचितमस्ति महाभाष्यम्। शिष्यः सूत्राणां वार्तिकानाम्

च प्रयोजनम् आक्षेपान् च पृच्छति। प्रश्नानां समाधानं आचार्यः सिद्धान्तरूपेण विशदयति। महाभाष्ये एकैकस्य विभागस्य आह्निकं इति संज्ञा। अह्ना निर्वृत्तं आह्निकम्। एकस्मिन् दिने गुरोः शिष्याणां च मध्ये परस्पर सम्भाषणेन यद् पठितं तद् एकस्मिन् आह्निके निबद्धमस्ति। अस्मिन् ग्रन्थे आचार्यः उदाहरणानि प्रत्युदाहरणानि च लैकिकव्यवहारशब्देन विशदयति। शब्दव्यवहारविषये परमं प्रामाण्यं भाष्यकारस्य एव। अष्टाध्यायीसूत्रक्रमानुसारं भाष्यं विरचितम्। महाभाष्ये प्रथमाध्याये प्रथमपादे प्रथमसूत्रं भवति 'वृद्धिरादैच्'।

**'वृद्धिरादैच्'**

'वृद्धिरादैच्' [5] (१-१-१) इति सूत्रस्य वृद्धिः आदैच् इति पदच्छेदः। द्विपदमिदं सूत्रम् । सूत्रेण अनेन वृद्धिसंज्ञा विधीयते। आत् च ऐच् च अनयोः समाहारः आदैच् इति समाहारद्वन्द्वः। एच् इति प्रत्याहारः। अनेन ऐ, औ वर्णयोः ग्रहणम्। आदैच्च वृद्धिसंज्ञः स्यादिति सूत्रार्थः। आकारैकारौकाराणां वृद्धिसंज्ञा स्यादित्यर्थः।

अस्मिन् सूत्रे कुत्वनिषेधः, तद्भावितग्रहणनिषेधः आदैच् मात्रस्य ग्रहणम्, समुदायसंज्ञानिराकरणम्, तपरकरणं, संज्ञासंज्ञ्यसन्देहाश्च, विस्तरेण प्रतिपादितानि। तत्र प्रथमं कुत्वं प्रतिपाद्यते।

- **कुत्वनिषेधः-**

'वृद्धिरादैच्' इति सूत्रे 'चो कुः'[6] (८-२-३०) इति सूत्रेण चकारस्य कुत्वेन ककारःन स्यात्। किन्तु भत्वात् इति। भत्वादित्यस्य भसंज्ञा अस्ति। पदसंज्ञा नास्ति। अतः कुत्वं न भवतीत्यर्थः। अत्र भसंज्ञा 'यचिभम्' [7] (१-४-१८) इति सूत्रेण नास्ति। 'अयस्मयादीनि छन्दसि' इत्यनेन अत्र भसंज्ञा क्रियते। च्छन्दसि इत्युक्ते इदं न छन्दः इति चेत् न छन्दोवत्सूत्राणि भवन्ति। यदि अस्मिन् सूत्रे भसंज्ञा अस्ति तर्हि 'वृद्धिरादैजदेङ्गुणः' इति संहितापाठे जश्त्वं न प्राप्नोति इति दोषः। तस्य न्यायीकरणं एवं क्रियते उभयसंज्ञान्यपि छन्दसि दृश्यन्ते- वेदे एकस्यैव संज्ञाद्वयं दृश्यते। तद्यथा 'स सुष्टुभास ऋग्वता गणेन' इत्यत्र 'ऋच्' इत्यवस्थायां पदसंज्ञत्वत् 'चो कुः' इति कुत्वं सिद्ध्यति। किन्तु भसंज्ञकस्य विद्यमानत्वात् जश्त्वं न भवति च। एवं 'वृद्धिरादैच्' इत्यत्रापि पदसंज्ञापक्षे जश्त्वं प्राप्य 'वृद्धिरादैजदेङ्गुणः' इति सिद्ध्यति। भसंज्ञापक्षे कुत्वं न प्राप्नोति च। पदसंज्ञया तकारस्य जश्त्वं भसंज्ञया चकारस्य कुत्वं च न स्यादित्यर्थः। [8]

**तद्भावितग्रहणनिषेधः-**

ततः तद्भावितग्रहणनिषेधः प्रतिपादयति।[९] वृद्धिः स्यात् इत्युक्ता। विहितानाम् अकार ऐकार औकार ग्रहणे तत् हि तत् तद्भावितग्रहणम्। सर्वेषां आकारादीनां ग्रहणं तर्हि तत् अतद्भावितग्रहणं इति च उच्चते। अत्र तद्भावितग्रहणे दोषाः प्रदर्श्यन्ते। प्रथमं तावत्

१. शालीः मालीयः इत्यादौ 'वृद्धाच्छः' (२-४-११४) इति च्छ प्रत्यये न भवति इति दोषः। तथाहि तद्भावितग्रहणे वृद्धिपदं उच्चार्य विहितस्यैव वृद्धिः स्यात्। अत्र तु आकारः स्वभावितः। अतः तस्य वृद्धिसंज्ञा न स्यात्। अतः च्छ प्रत्ययोऽपि न स्यात्। एवं आम्रमयं, शालमयं इत्यादौ 'नित्यं वृद्धशरादिभ्यः' (४-३-१४४) इति मयट् न प्राप्नोति। आम्रगुप्तेः अपत्यं आम्रगुप्तायनि, शालगुप्तेः अपत्यं शालगुप्तायनि इत्यादौ 'उदीचां वृद्धात् अगोत्रम्' (४-१-१४७) इति सूत्रेण विधीयमान फिञ् प्रत्ययः न प्राप्नोति इति दोषः । पुनः आदेच् मात्रग्रहणे दोषाः प्रदर्श्यन्ते। तथाहि सर्वेषां आकारादीनाम् वृद्धिसंज्ञा विधीयते चेत् सर्वो भासः इत्यत्र भास शब्दस्य आकारस्य वृद्धिसंज्ञा भवेत्। एवं चेत् 'उत्तरपदवृद्धौ सर्वं च' इति सूत्रेण सर्वं इत्यत्र उदात्तत्वं प्राप्नुयात् इति दोषः। तद्वत् तावद्भार्या, यावद्भार्या इत्यादौ पुंवद्भावप्रतिषेधः प्राप्नोति। 'यावती भार्या' , 'तावती भार्या' इत्यवस्थायां भार्या इति पदस्य आकारस्य वृद्धिसंज्ञा अस्ति चेत् 'वृद्धिनिमित्तस्य चेत्तद्धितस्य' इत्यनेन वृद्धिनिमित्तस्य पुंवद्भावप्रतिषेधः प्राप्नोति।

२. तथाहि 'उत्तरपदवृद्धौ सर्वं च' इति सूत्रेण उत्तरपदस्य वृद्धिः उत्तरपदवृद्धिः - उत्तरपदवृद्धाविति एवं न विज्ञायेत। किन्तु 'उत्तरपदस्य' इत्यधिकारे या वृद्धिः तस्मिन् पदे इत्येवार्थः। 'सर्वोभासः सर्वभास' इत्यतः भासशब्दस्य आकारस्य पूर्वोक्तरीत्या विहितत्वाभावान्न दोषः। अथवा तद्भावितग्रहणे सत्यपि 'सर्वैकारकः' सर्वकारकः इत्यत्र उदात्तत्वं प्राप्नोति। 'कारक' इत्यत्र कृञ् धातोः ण्वुलि तस्य आकारादेशः । 'अचो ञ्णिति' इति वृद्धौ कारकः इति रूपम्। अत्र हि तद्भावितग्रहणपक्षः अपि वृद्धिसंज्ञा उच्चार्य विहिता वृद्धिः अस्ति इत्यतः सर्वशब्दस्य उदात्तत्वप्राप्ति। तद्वारणाय 'उत्तरपदस्य' इत्यधिकारे या वृद्धिः इत्येवं व्याख्यायेम। 'तावती भार्या', 'यावती भार्या' इत्यत्र वृद्धिनिमितस्य च तद्धितस्य शक्तविकारे इत्यनेन अत्र प्राप्तं पुंवद्भावप्रतिषेधं न भवति। तथाहि सूत्रमेवं अवश्यं एव व्याख्यातव्यम्। 'वृद्धिनिमित्तस्य' इति सूत्रेण

वृद्धेः निमितं यस्मिन् साऽयं वृद्धिनिमित्तः इति व्याख्यानात् वृद्धेः निमित्ताः प्रत्ययाः यत्र परत्वेन श्रूयन्ते तत्रैव पुंवद्भावप्रतिषेधः। अत्र भार्या शब्दे वृद्धिनिमित्तः प्रत्ययः परत्वेन नास्ति। अतः अत्र पुंवद्भावप्रतिषेधं न भवति। एवं 'वृद्धिरादैच्' इति सूत्रे आदैच् मात्रस्य ग्रहणम् न तु तद्भावितानामिति सिद्धान्तः।

**समुदायसंज्ञानिराकरणम्**

'वृद्धिरादैच्' इति सूत्रेण वृद्धिसंज्ञा, 'अदेङ्गुणः' (१-१-१) इति सूत्रेण गुणसंज्ञा च प्रत्येकम् वक्तव्ये। यतः 'मुजेर्वृद्धिः' (७-२-११४) समुदाये वृद्धिगुण संज्ञयोरप्रसङ्गः। यत्र यत्र समुदाये कार्यं करोति तत्र तत्र आचार्येण सह वचनं क्रियते। तथा 'सह सुपा', 'उभेऽभ्यस्तं' सह इत्यादि। सहवचनाभावात् प्रत्येकं संज्ञा वक्तुं शक्यते। अतः प्रत्येकं इति वचनं आवश्यकम्। ततः प्रत्येकवचनं च वाक्यपरिसमाप्तिः दृश्यते। यथा देवदत्तः, यज्ञदत्तः, विष्णुमित्रादयः भोज्यन्तामिति। अत्र प्रत्येकमिति न उच्यते। अत्र प्रत्येकबोधं लभ्यते। ननु समुदाये वाक्यपरिसमाप्तिः दृश्यते यथा 'गर्गाः शतं दण्ड्यन्ताम्' इति। अत्र समुदाये बोधः जायते। अत्र राजा प्रत्येकं न दण्डयति। एतयोः दृष्टान्तयोः सतोः यदि समुदायग्रहणे सह ग्रहणं क्रियते तर्हि अत्रापि प्रत्येकमिति आवश्यकम्। तत्र प्रत्येकं इति पदेन किमपि नास्ति। अतः प्रत्येकबोधनार्थ प्रत्येकं वचनम् आवश्यकम्।[10]

**तपरकरणम्**

तत; तपरकरणाप्रयोजनं प्रतिपादयति। आकारस्य तपरकरणं सवर्णार्थं यतो हि गुणाः भेदकाः सन्ति। अतः तेषां ग्रहणं न प्राप्नेति तत् न 'अस्तिदधि' इत्यादि सूत्रे उदात्तग्रहणेन ज्ञायते अभेदकाः गुणाः। न च गुणानां अभेदकत्वे अनुदात्तेः यत् कार्यं विहितं तत् स्वरितेऽपि स्यात् इति वाच्यम्। अस्ति प्रयत्ने स्वरूपेण उच्चरिताः गुणाः भेदकरूपाः भवन्ति। असन्देहार्थे अपि तकारः न कर्तुं शक्यते। 'व्याख्यानतो विशेषप्रतिपत्तिः नहि सन्देहादलक्षणम्' इति परिभाषया ज्ञातुं शक्यत्वात्। अतः त्रिमात्रचर्तुमात्रस्थानिनां त्रिमात्रयर्तुमात्रआदेशः न अभूवन्। एतदर्थं तपरकरणम् 'तपरस्तत्कालस्य' (१-१-७०)। अत्र बहुव्रीहितत्पुरुषौ 'ऋदोरप्' (३-३-७७), अत्र तु दकारः।

**संज्ञासंश्यसंदेहश्च**

बुद्धिः, आख्या, चेतना ,हस्तैरर्थसूचनं, गायत्री, सूर्यपत्नी, सङ्केतवत्प्रातिपदिकम् (विशिष्टनाम) इत्येते अर्थाः संज्ञाशब्दस्य सन्ति। 'रूढं सङ्केतवन्नाम

सैव संज्ञेति कीर्त्यते' इति शब्दशक्तिकारिकायामुक्तम्। तत्र संज्ञा त्रिविधा नैमित्तिकी, पारिभाषिकी, औपाधिकी चेति।

संज्ञायते [11] इति संज्ञा, संज्ञानात् संज्ञा [12] इति संज्ञाशब्दस्य द्विविधा निरुक्तिः। संज्ञा इति पदं साङ्केतिकपदं इति पदस्य तुल्यत्वेन [13] पाणिनिना चतुर्षु भागेष्वेव सूचितम्।

लोकवेदयोः लोकव्यवहारे स्थितस्य प्रयोगस्य एव प्राधान्यं पाणिनिना निर्दिष्टम्। तस्य अभिप्राये वैयाकरणानां उक्तेः प्राधान्यं लोकव्यवहारस्य एव केवलं भवति।[14]

वर्धनं इति वृद्धिः। वृध् धातोः 'स्त्रियांक्तिन' इति सूत्रेण भावार्थे क्तिन् प्रत्ययेन निष्पन्नं रूपं भवति 'वृद्धि'ः। 'वृद्धिरादैच्' इति सूत्रेण पाणिनिना वृद्धिसंज्ञा विधीयते। 'आदौ गौप्' इति 'जैनेन्द्रव्याकरणे'[15] वृद्धिसंज्ञायाः स्थाने ऐप् संज्ञायाः विधानं क्रियते। 'आरै औ वृद्धिः' इति सारस्वतव्याकरणे वृद्धिसंज्ञा विधीयते। [16]

संज्ञासूत्रे संज्ञा, संज्ञी च वर्तेते। अतः सूत्रे का संज्ञा, कः संज्ञी इति कथं ज्ञायते चेत् तर्हि 'वृद्धिरादैच्' सूत्रस्य भाष्ये पतञ्जलिना संज्ञासंज्ञिज्ञानाय चत्वारि कारणानि प्रदर्शितानि। तथा हि -

(क) यत्र त्वन्यतरलघु यल्लघु सा संज्ञा।

(ख) अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः।

(ग) आवर्तिन्यः संज्ञा भवन्ति।

(घ) पूर्वोच्चरितः संज्ञी, परोच्चरिता संज्ञा।

विचित्रसूत्रस्य कृतिः पाणिनेः भवति। संज्ञासूत्रे संज्ञासंज्ञिनिर्देशार्थं नास्ति कोऽपि साधारणानियमः। अत एव आचार्यपारम्पर्योपदेशसिद्धसंज्ञाधिकारात् संज्ञासिद्धिः भवति।

'वृद्धिरादैच्' इति सूत्रस्य भाष्ये 'अथ संज्ञा' इत्यधिकारः कर्तव्यः इत्युक्तम्। अन्यथा सर्वेषामपि संज्ञासूत्राणां वाच्यार्थं स्यात् इति च प्रतिपादितम्। तस्य समाधानभूतं इदं वार्तिकं 'आचार्याचारात् संज्ञासिद्धिः' । तस्य अयं अर्थः-लोके तावत् मातापितरौ जातस्य पुत्रस्य संवृते अवकाशे देवदत्तः इत्यादि नाम करोति। तयोः व्यवहारात् अन्येऽपि जानन्ति इयं अस्य संज्ञा इति। तद्वत् व्याकरणशास्त्रे अपि पाणिन्यादीनां आचार्याणां व्यवहारात् वृद्धिः इत्यादीनां संज्ञात्वं सिद्ध्यति। तथाहि प्रथमं तावत् 'वृद्धिरादैच्' इत्युच्यते, तदनन्तरं 'सिचिवृद्धिः परस्मैपदेषु' इत्यादि सूत्रे आकारैकरौकारान् उदाहरन्ति। तेन अस्माभिः ज्ञातुं शक्यते वृद्धिः इति

आकारादीनां संज्ञा इति। 'वृद्धिरादैच्' इति एवं उच्चते। 'अथ संज्ञा' इत्यधिकारसूत्रं पठित्वा संज्ञायाः बोधनाय वृद्धयादयः शब्दाः पठितव्याः। अन्यथा 'दशदाडिमानि षडपूपाः' इत्यादिवत् संज्ञासूत्राणि अनर्थकानि भवेयुः। किञ्च इयं संज्ञा अयं संज्ञी - अस्य संशयस्य निवारणमपि कर्तव्यम्। 'वृद्धिरादैच्' इत्यत्र 'वृद्धि' संज्ञा 'आदैच्' संज्ञी इति स्पष्टं ज्ञातुं न शक्यते। तत्र उच्यते 'आचार्यव्यवहारात् संज्ञा सिद्धयति'। 'वृध्' धातु धातुपाठे उपदिशति। 'आदैचां च' अक्षरसमाम्नायपाठेन साधुत्वं शक्तेः वाच्यार्थवारणाय संज्ञासूत्रत्वं इत्येवं वक्तुं न शक्यते। अपि तु प्रयोगनियमार्थं 'वृद्धिरादैच्' इति सूत्रं आरभ्यते, पूर्वं वृद्धिशब्दः तदनन्तरं आदैच् शब्दश्च प्रयोक्तव्यः इति तस्य अर्थः । एवं - न इह प्रयोगनियमः आरभ्यते इति। तत् समर्थनाय उक्तं - संस्कृत्य संस्कृत्य पदान् उत्सृज्यन्ते इत्यादि। व्याकरणेन शास्त्रेण तावत् एकैकं पदं संस्कृत्य प्रयोगार्थं दीयते। तेषां शब्दानां यथेष्टं सम्बन्धो भवति। तथाहि 'पात्रं आहर' इतिवत् 'आहर पात्रं' इत्यपि वक्तुं शक्यते। अतः अत्र प्रयोगनियमः नास्ति इति तात्पर्यम्। किं च अष्टमे अध्यायेऽपि 'तस्य परमाम्रेडितम्' इत्यादिभिः सूत्रैः संशयकरणात्। तत्रापि इह क्रियमाणस्य संज्ञाधिकारस्य अनुवृत्तिः करणायं स्याते। अतः प्रकृते संज्ञाधिकारं न आवश्यकं अपि सिद्धयति।

संज्ञासंज्ञिभावेपि निस्सन्देहं विज्ञायते आचार्याचारादिति उक्तत्वात्। अथवा आवृत्तिन्यः संज्ञात्वं अनावृत्तिन्यः संज्ञित्वम्। अथवा अन्यतरलघुसंज्ञा-लघ्वर्थं हि संज्ञा क्रियते। अथवा पूर्वोच्चारितः संज्ञी परोच्चारितः संज्ञा इति। 'अदेङ्गुणः', 'सुप्तिङन्तं पदम्', 'क्तवतू निष्ठा', इत्यादिषु सूत्रेषु पूर्वोच्चारितः संज्ञी परोच्चारितः संज्ञा इति बोधः जायते। 'वृद्धिरादैच्' इति एकस्मिन् सूत्रे एव संज्ञा पूर्वोच्चारिता तत् मङ्गलार्थमेव। एवं 'वृद्धिरादैच्' संज्ञासूत्र एव भवति। संज्ञाधिकारः क्रियते चेत् दोषाय भवति। यतः अष्टाध्याय्याम् अपि संज्ञासूत्रं विधीयते तत्रापि संज्ञानुवर्तनं भवेत्। अथवा अयमधिकारः अस्थाने एव। यथा विश्वे 'अयं गौः' इति वाक्यात् मांसपिण्डस्य गौःइति संज्ञाबोधः जायते। 'अयं गौः' इति उक्त्वा अनन्तरं इयं अस्य संज्ञा न भवति तथापि संज्ञा बोधः। तद्वत् 'वृद्धिरादैच्' इत्युक्त्वा इयं संज्ञा। वस्तुतस्तु मंङ्गलार्थमेव 'वृद्धिरादैच्' इति सूत्रं पठितं इति वक्तुं शक्यते।

**उपसंहारः**

पूर्वोक्तविषयाणां समीक्षया अधोनिर्दिष्टानि कार्याणि प्राधान्येनावगतानि-

- पदसंज्ञया तकारस्य जश्त्वं, चकारस्य कुत्वं न स्यादिति कुत्वनिषेधः।
- 'वृद्धिनिमित्तस्य' इति सूत्रेण वृद्धेः निमित्तः प्रत्ययाः यत्र परत्वेन श्रूयन्ते तत्रैव पुवंद्भावप्रतिषेधः। अत्र भार्याशब्दे वृद्धिनिमित्तः प्रत्ययः परत्वेन नास्ति। अतः अत्र पुंवद्भावप्र[illegible]षेधो न भवति। एवं 'वृद्धिरादैच्' इति सूत्रे 'आदैच्' [illegible]त्रस्य ग्रहणम् न तु तद्भावितानामिति सिद्धान्तः।

  'प्रत्यवयवं च वाक्यपरिसमाप्तेः' इति वार्तिकेन तस्य उदाहरणभूतं इदं वाक्यं देवदत्त, यज्ञदत्त इत्यादि। तस्य अयं अर्थः-देवदत्तयज्ञदत्तविष्णुमिश्रा भोज्यन्तां इति केनचित् उच्यते। ते च प्रत्येकं प्रत्येकं भोज्यन्तां इति न उच्यते। तथापि प्रत्येकमेव भोजनं क्रियते। तद्वत् अत्रापि समुदायस्य वृद्धिसंज्ञा न भवति। अपि तु आकारादीनां प्रत्येकमेव।
- असन्देहार्थो अपि तकारः न कर्तुं शक्यते। 'व्याख्यानतो विशेषप्रतिपत्तिः' इति परिभाषया ज्ञातुं शक्यत्वात्। अतः त्रिमात्रचर्तुमात्रस्थानिनां त्रिमात्रचर्तुमात्रआदेशः न अभूवन्। एतदर्थं तपरकरणम् 'तपरस्तत्कालस्य'। अत्र बहुव्रीहितत्पुरुषौ। 'ऋदोरप्' अत्र तु दकारः।
- संज्ञासूत्रे संज्ञा, संज्ञी च वर्तेते। अतः सूत्रे का संज्ञा कः संज्ञी इति कथं ज्ञायेत् तर्हि 'वृद्धिरादैच्' सूत्रस्य भाष्ये पतञ्जलिना संज्ञासंज्ञिज्ञानाय चत्वारि कारणानि प्रदर्शितानि। तथा हि-

(क) यत्र त्वन्यतरलघु यल्लघु सा संज्ञा।

(ख) अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः।

(ग) आवर्तिन्यः संज्ञा भवन्ति।

(घ) पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा।

विचित्रा सूत्रस्य कृति पाणिनेः भवति। संज्ञा सूत्रे संज्ञासंज्ञिनिर्देशार्थं नास्ति कोऽपि साधारणनियमः। अत एव आचार्यपारम्पर्योपदेशसिद्धसंज्ञाधिकारात् संज्ञासिद्धिः भवति।

- मंङ्गलार्थमेव 'वृद्धिरादैच्' इति सूत्रं प्रथमं पठितः।

अवलम्बग्रन्थाः।


१. जयादित्यवामनः - पाणिनीयव्याकरणसूत्रवृत्तिः-काशिका सटिप्पणी प्रकाशा हिन्दीव्याख्योपेता (प्रथमः भागः) व्याख्याकारः श्रीनारायणमिश्र चौखम्बा संस्कृतसंस्थानम्- वाराणसी- २००९.

२. पतञ्जलिः - व्याकरणमहाभाष्यम्- भार्गवशास्त्री जोशी (सं), चौखम्बा संस्कृत प्रतिष्ठान् (प्र) दिल्ली, पुनर्मुद्रितसंस्करणम् (१,२,३,४,५,६ भागा)- १९९२.

३. महर्षिपाणिनिः - अष्टाध्यायी सूत्रपाठः - भारतीय विद्या प्रकाशन्- वारणासी- प्रथमसंस्करणम्- १९९७.

४. श्रीमद्भट्टोजिदीक्षतः - वैय्याकरणसिद्धान्तकौमुदी- (प्रथमो भागः) - मोतीलाल बनारसीदास्- प्रथमसंस्करणम्, दिल्ली- १९६५.

५. श्रीमद्वरदराजभट्टाचार्यः - लघुसिद्धान्तकौमुदी- चौखम्बा संस्कृत सीरीस् ओफिस्- वाराणसी चौखम्बा अमरभारती प्रकाशन् (प्र) - वाराणसी- १९७७.

६. ए.नी.ईश्वरः - निबन्धसङ्ग्रहः विश्वसंस्कृत प्रतिष्ठानम् (संस्कृत भारती) केरलम् प्रथममुद्रणम्, २०००.

७. डॉ. जी.गंगाधरन् नायरः - संस्कृतव्याकरणचरितम्- प्रथम मुद्रणम्- तृप्पूणित्तुरा- १९९७.